श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्वितीयः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्वितीयः सर्गः ॥

## अगस्त्येन पुलस्त्यस्य गुणतपसोर्वर्णनं ततो विश्रवस उत्पत्तेः कथनं च

तस्य तद् वचनं श्रुत्वा राघवस्य महात्मनः।
कुम्भयोनिर्महातेजा वाक्यमेतदुवाच ह ॥ 7.2.1 ॥

शृणु राम यथा वृत्तं तस्य तेजोबलं महत्।
जघान शत्रून् येनासौ न च वध्यः स शत्रुभिः ॥ 7.2.2 ॥

तावत् ते रावणस्येदं कुलं जन्म च राघव।
वरप्रदानं च तथा तस्मै दत्तं ब्रवीमि ते ॥ 7.2.3 ॥

पुरा कृतयुगे राम प्रजापतिसुतः प्रभुः।
पुलस्त्यो नाम ब्रह्मर्षिः साक्षादिव पितामहः ॥ 7.2.4 ॥

नानुकीर्त्या गुणास्तस्य धर्मतः शीलतस्तथा।
प्रजापतेः पुत्र इति वक्तुं शक्यं हि नामतः ॥ 7.2.5 ॥

प्रजापतिसुतत्वेन देवानां वल्लभो हि सः।
इष्टः सर्वस्य लोकस्य गुणैः शुभैर्महामतिः ॥ 7.2.6 ॥

स तु धर्मप्रसङ्गेन मेरोः पार्श्वे महागिरेः।
तृणबिन्द्वाश्रमं गत्वाप्यवसन्मुनिपुङ्गवः ॥ 7.2.7 ॥

तपस्तेपे स धर्मात्मा स्वाध्यायनियतेन्द्रियः।
गत्वाऽऽश्रमपदं तस्य विघ्नं कुर्वन्ति कन्यकाः॥ **7.2.8** ॥

ऋषिपन्नगकन्याश्च राजर्षितनयाश्च याः।
क्रीडन्त्योऽप्सरसश्चैव तं देशमुपपेदिरे॥ **7.2.9** ॥

सर्वर्तुषूपभोग्यत्वाद् रम्यत्वात् काननस्य च।
नित्यशस्तास्तु तं देशं गत्वा क्रीडन्ति कन्यकाः॥ **7.2.10** ॥

देशस्य रमणीयत्वात् पुलस्त्यो यत्र स द्विजः।
गायन्त्यो वादयन्त्यश्च लासयन्त्यस्तथैव च॥ **7.2.11** ॥

मुनेस्तपस्विनस्तस्य विघ्नं चक्रुरनिन्दिताः।
अथ रुष्टो महातेजा व्याजहार महामुनिः॥ **7.2.12** ॥

या मे दर्शनमागच्छेत् सा गर्भं धारयिष्यति।
तास्तु सर्वाः प्रतिश्रुत्य तस्य वाक्यं महात्मनः॥ **7.2.13** ॥

ब्रह्मशापभयाद् भीतास्तं देशं नोपचक्रमुः।
तृणबिन्दोस्तु राजर्षेस्तनया न शृणोति तत्॥ **7.2.14** ॥

गत्वाऽऽश्रमपदं तत्र विचचार सुनिर्भया।
न चापश्यच्च सा तत्र काञ्चिदभ्यागतां सखीम्॥ **7.2.15** ॥

तस्मिन् काले महातेजाः प्राजापत्यो महानृषिः।
स्वाध्यायमकरोत् तत्र तपसा भावितः स्वयम्॥ **7.2.16** ॥

सा तु वेदश्रुतिं श्रुत्वा दृष्ट्वा वै तपसो निधिम्।
अभवत् पाण्डुदेहा सा सुव्यञ्जितशरीरजा॥ **7.2.17** ॥

बभूव च समुद्विग्ना दृष्ट्वा तद्दोषमात्मनः।
इदं मे किंत्विति ज्ञात्वा पितुर्गत्वाऽऽश्रमे स्थिता॥ **7.2.18** ॥

तां तु दृष्ट्वा तथाभूतां तृणबिन्दुरथाब्रवीत्।
किं त्वमेतत्त्वसदृशं धारयस्यात्मनो वपुः॥ 7.2.19 ॥

सा तु कृत्वाञ्जलिं दीना कन्योवाच तपोधनम्।
न जाने कारणं तात येन मे रूपमीदृशम्॥ 7.2.20 ॥

किं तु पूर्वं गतास्म्येका महर्षेर्भावितात्मनः।
पुलस्त्यस्याश्रमं दिव्यमन्वेष्टुं स्वसखीजनम्॥ 7.2.21 ॥

न च पश्याम्यहं तत्र काञ्चिदभ्यागतां सखीम्।
रूपस्य तु विपर्यासं दृष्ट्वा त्रासादिहागता॥ 7.2.22 ॥

तृणबिन्दुस्तु राजर्षिस्तपसा द्योतितप्रभः।
ध्यानं विवेश तच्चापि अपश्यदृषिकर्मजम्॥ 7.2.23 ॥

स तु विज्ञाय तं शापं महर्षेर्भावितात्मनः।
गृहीत्वा तनयां गत्वा पुलस्त्यमिदमब्रवीत्॥ 7.2.24 ॥

भगवंस्तनयां मे त्वं गुणैः स्वैरेव भूषिताम्।
भिक्षां प्रतिगृहाणेमां महर्षे स्वयमुद्यताम्॥ 7.2.25 ॥

तपश्चरणयुक्तस्य श्राम्यमाणेन्द्रियस्य ते।
शुश्रूषणपरा नित्यं भविष्यति न संशयः॥ 7.2.26 ॥

तं ब्रुवाणं तु तद् वाक्यं राजर्षिं धार्मिकं तदा।
जिघृक्षुरब्रवीत् कन्यां बाढमित्येव स द्विजः॥ 7.2.27 ॥

दत्त्वा तु तनयां राजा स्वमाश्रमपदं गतः।
सापि तत्रावसत् कन्या तोषयन्ती पतिं गुणैः॥ 7.2.28 ॥

तस्यास्तु शीलवृत्ताभ्यां तुतोष मुनिपुङ्गवः।
प्रीतः स तु महातेजा वाक्यमेतदुवाच ह॥ 7.2.29 ॥

परितुष्टोऽस्मि सुश्रोणि गुणानां सम्पदा भृशम्।
तस्माद् देवि ददाम्यद्य पुत्रमात्मसमं तव॥ **7.2.30** ॥

उभयोर्वंशकर्तारं पौलस्त्य इति विश्रुतम्।
यस्मात् तु विश्रुतो वेदस्त्वयेहाध्ययतो मम॥ **7.2.31** ॥

तस्मात् स विश्रवा नाम भविष्यति न संशयः।
एवमुक्ता तु सा देवी प्रहृष्टेनान्तरात्मना॥ **7.2.32** ॥

अचिरेणैव कालेनासूत विश्रवसं सुतम्।
त्रिषु लोकेषु विख्यातं यशोधर्मसमन्वितम्॥ **7.2.33** ॥

श्रुतिमान् समदर्शी च व्रताचाररतस्तथा।
पितेव तपसा युक्तो ह्यभवद् विश्रवा मुनिः॥ **7.2.34** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्वितीयः सर्गः॥